National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2024; 1(57): 216-218
© 2024 NJHSR
www.sanskritarticle.com

वैजयन्तिमाला रथ
शोधच्छात्रा, पुराणेतिहासविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

Correspondence:
वैजयन्तिमाला रथ
शोधच्छात्रा, पुराणेतिहासविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

# पद्मपुराणानुसारं तीर्थक्षेत्राणां माहात्म्यम्

**वैजयन्तिमाला रथ**

उक्तम् अस्ति - **'तीर्थी कुर्वन्ति साधवः'**। साधकस्य तपस्याशक्त्या तीर्थस्थानानां महत्त्वं वर्धते। शताब्दशः भारतस्य धार्मिकक्षेत्रे धर्मस्य संस्थापकस्य एतादृशस्य महान् पुरुषस्य अभावात् तीर्थस्थलानां एषा दुर्दशा अभवत्। आदर्शभ्रष्टजातिः अनाचारं, दुराचारं, व्यभिचारं च विना बाधकं कृत्वा तीर्थस्थानानि दूषयति स्म। सिंहस्थकाले अस्याः पवित्रभूमिः दुष्टजनानाम् रक्षणं महत्त्वपूर्णम् अस्ति।

**पद्मपुराणानुसारं तीर्थक्षेत्राणि –**

**पुष्करतीर्थेन तापत्रयविनाशः -**

चन्द्रनद्याः उत्तरे प्राचि सरस्वतीं यावत् नन्दननामकस्थाने कल्पनामकस्थानपर्यन्तं भूमिः पुष्करतीर्थनाम्ना प्रसिद्धमस्ति। अत्र ब्रह्मा यज्ञनिमित्ताय वेदं निर्मितवान्। त्रयः पुष्कराः प्रसिद्धाः। यथा-
ज्येष्ठपुष्करः- अस्य देवता ब्रह्मा।
मध्यमपुष्कर - अस्य देवता विष्णुः।
कनिष्ठपुष्करः - अस्य भगवान् रुद्रः।

अत्र ब्रह्मा सदा निवासकरणेन पृथीव्यां वसतः प्राणिनः प्रति दयाकरणात् पुष्करतीर्थमिति नाम सञ्जातम्। पुनश्च अत्र श्रीभगवान् विष्णु, रुद्रः, अष्टवसवः, द्वे अश्वीनिकुमारौ मरुद्गणः, स्वर्गवासी देवता देवराजेन्द्रेण सह अत्र विहरन्ति। यः ब्राह्मणः अग्निहोत्रपरायणो भूत्वा संहिताक्रमेण विधिपूर्वकं मन्त्राणामुच्चारणं करोति अत्र तथा च वेदपाठं करोति सः ब्रह्मणः कृपां लब्ध्वा ब्रह्मलोकं प्राप्नोति । यः स्वभावतः क्रोधहीनः सत्यवादी दृढतापूर्वकः उत्तमव्रतपालनं करोति, सम्पूर्णप्राणीनां कृते आत्मभावं प्रदर्शयति सोऽवश्यं तीर्थसेवनस्य फलं प्राप्नोति । अत्यन्तपवित्रसरस्वती नदी ज्येष्ठपुष्करे प्रविशति। तत्र चैत्रशुक्लाचतुर्दश्यां ब्रह्मादिदेवताऋषीणां सिद्धचरणानामागमनं भवति। तत्र स्नानेन अभयपदं प्राप्नोति। कुलस्य उद्धारो भवति। देवाय पितृपुरुषाय तर्पणेन मनुष्यः विष्णुलोके प्रतिष्ठितः भवति। ज्येष्ठपुष्करे स्नानकरणेन चन्द्रमासदृशः निर्मलः भवति। ब्रह्मलोके उत्तमगतेः प्राप्तिर्भवति। अत्र तपस्यां कृत्वा देवतादैत्यब्रह्मर्षयः दिव्ययोगसम्पन्नाः महान्तः पुण्यशालिनः अभवन्। देवाः महापुण्ययुक्ताः सन्तः इच्छानुसारं सिद्धिं प्राप्नुवन्ति। तथा चोच्यते-

**यस्य हस्तौ च पादौ च मनश्चैव सुसयतम्।**
**विद्यातपश्च कीत्तिश्च स तीर्थफलमश्नुते।**
**प्रतिग्रहापावत्तः सन्तुष्टो येन केनचित्।**
**अहङ्कारनिवृत्तश्च स तीर्थफलमश्नुते।**
**अक्रोधनश्च राजेन्द्र सत्यशीलो दृढव्रतः।**
**आत्मोपमश्च भूतेषु स तीर्थफलमश्नुते॥**[1]

अत्र स्नानकरणेन अश्वमेधयज्ञस्य दशाधिकफलं प्राप्नोति। कार्त्तिकपूर्णिमायां पुष्करतीर्थे यात्राकरणेन अक्षयफलं प्राप्नोति। संयमपवित्रतया सह दशवर्षाणि यावत् तिष्ठति चेत् ब्रह्मणः दर्शनं प्राप्नोति। सम्पूर्णयागस्य फलं प्राप्नोति, अन्ते ब्रह्मलोकं याति। शतवर्ष यावत् अग्निहोत्रं करोति, कार्तिकमासे पूर्णिमायां निवासं करोति चेत् ब्रह्मलोकं याति।

सायंकाले प्रातः हस्तबद्धाञ्जलिना पुष्करत्रयस्य स्मरणं करोति यः सः सर्वेषां तीर्थानां आचमनस्य फलं प्राप्नोति। अत्र पिण्डदानेन श्राद्धकरणेन अक्षयफलं प्राप्नोति। पत्न्या सह पिण्डदानेन पुत्रं धनं धान्यमित्यादीनां कदापि नाशो न भवति।

**पुष्करतीर्थवासिनां कर्त्तव्यम् -**

अहंकारं परित्यजेत्। बन्धुबान्धवान् प्रति अनासक्तरहितः स्यात्। धनं प्रति अनादरो शुभकर्म कुर्यात्। नित्यं प्राणायामं कुर्यात्। परमेश्वरस्य ध्यानम्, जपमाध्यमेन अन्तकरणशुद्धिं कुर्यात्। यतिधर्मस्य कर्तव्यं पालयेत्, सांख्ययोगविधिं जानीयात्।

ब्रह्मज्ञानप्राप्त्यर्थं प्रयासं कुर्यात्। अत्र क्षेत्रनिवासी ब्राह्मणो यज्ञं कुर्यात्। अस्मिन् क्षेत्रे यः प्राणत्यागं करोति स ब्रह्मसम्बन्धिपराविद्यायां स्थितो भवति।

पुष्करतीर्थे स्त्रियः, प्लेच्छाः, शुद्रः, पशुपक्षिणः मृगाः अंध-मूक-वधिराः प्राणिनः ब्रह्मलोकं प्राप्नुवन्ति। अत्र श्रीविष्णु-इन्द्रादिदेवताः जगद्धिताय ब्रह्मनिवासस्थाने पुष्करक्षेत्रे सदा विद्यमानाः सन्तः सत्ययुगे द्वादशवर्ष यावत्, त्रेतायां एकवर्ष यावत, द्वापरे एकमासं यावत् तीर्थसेवनेन यत् फलं प्राप्नोति कलौ एक दिनं रात्रश्च तीर्थसेवनेन तत्फलं प्रयच्छन्ति। ब्रह्मचारी गृहस्थ-वानप्रस्थ सन्यासिनः सर्वे स्वस्य शास्त्रधर्मस्य पालनं कृत्वा अत्र परमगतिं प्राप्नोति ।

पुष्करतीर्थे सरस्वती, सुप्रभा, काञ्चना, प्राची नन्दा, विशाला च पञ्चनद्यः स्वधारायां प्रवाहिताः भवन्ति। सरस्वतीनद्याः उत्तरतटे स्वस्य शरीरं त्यजेत् चेत सरस्वतीतटे जपं करोति चेत् पुनः जन्ममृत्युचक्रे न पतति मनुष्यः। अत्र स्नात्वा अश्वमेधयागस्य फलं प्राप्नोति। यः अत्र नियमेन उपवासद्वारा शरीरं शुष्कं करोति जलं वायुं पीत्वा पत्रं खादित्वा तपस्यां करोति, स ब्रह्मणः परमपदं प्राप्नोति। अत्र सुवर्णदानेन मेरुपर्वतदानस्य फलं प्राप्नोति। अत्र श्राद्धकरणेन एकविंशतिवारं स्वर्गलोकं प्राप्नोति। यः पुण्यात्मा मनुष्यः पुष्करतीर्थे विद्यमानसरस्वत्याः दर्शनं करोति स कदापि नरकगामी न भवति। स्नानेन ब्रह्मलोकं प्राप्नोति। ज्येष्ठपुष्करे स्नानकरणेन पितृपुरुष-तर्पणकरणेन नरकगामी न भवति। कार्तिकपूर्णिमायां मध्यमकुण्डे मध्यमपुष्करे स्नानं कृत्वा ब्राह्मणाय धनं ददाति चेत् अश्वमेधयज्ञस्य फलं प्राप्नोति। कर्निष्ठकुण्डे अन्यपुष्करे एकाग्रतापूर्वकं स्नानं कृत्वा ब्राह्मणाय ध्यान्यं ददाति चेत् अग्निलोकं गच्छति।

प्राचीनसरस्वतीजलदर्शनेन अश्वमेधयज्ञस्य फलं प्राप्नोति। स्नानकरणेन ब्रह्मणः अनुचरो भवति। रात्रावपि स्नानं करोति याचकाय धनं ददाति चेत् अनन्तसुखं प्राप्नोति।

**जम्बूमार्गतीर्थेन विविधपापानां विनाशः दुःखत्रयनिवारणम् -**

पितृपुरुषाणां देवतानाम् ऋषिणामपि पूजिततीर्थं भवति जम्बुमार्गतीर्थम्। अत्र गमनेन मनुष्यः अश्वमेधयागस्य फलं प्राप्नोति अन्ते च विष्णुलोकं याति। दिवसे एकवारमात्रं भोजनं कृत्वा पञ्चरात्रं निवसति चेत्तस्य दुर्गतिः न भवति। सः परमोत्तमां सिद्धिं प्राप्नोति।

ताण्डुलिकाश्रमयात्राकरणेन दुर्गतिः न भवति, स्वर्गलोके सम्मानं भवति। अगस्त्याश्रमं गत्वा देवतापितृपुरुषाणां पूजां कृत्वा त्रिरात्रमुपवासं करोति चेदग्निष्टोम-यागस्य फलं प्राप्नोति। शाकं फलं च खादित्वा जीवननिर्वाहं करोति चेत्परमोत्तमं कार्तिकेयधाम याति।

**कन्याश्रमतीर्थम् -**

सर्वेषां लोकानां पूजितं लक्ष्मीसेवितं कन्याश्रमतीर्थं धर्मारण्यकनाम्ना प्रसिद्धं पुण्यदायकं प्रधानं क्षेत्रम् । अत्र प्रवेशेन सर्वपापनाशो भवति। यः नियमानुकूलमाहारं कृत्वा शौचसन्तोषादिनियमपालनं कृत्वा देवतानां तथा पितृणां पूजां विदधाति सः सर्वकामदयज्ञस्य फलं प्राप्नोति । ययातिपतनगमनेन अश्वमेधयागस्य फलं प्राप्नोति ।

**कोटितीर्थम्-**

अत्र कोटितीर्थे स्नानं कृत्वा अश्वमेधयागस्य फलं प्राप्नोति। कोटितीर्थे भगवान् शिवः कोटिदानस्य वधं कृतवान्। अस्य तीर्थस्य दर्शनेन मनुष्यः सशरीरेण स्वर्ग याति।

अत्र त्रयोदश्यां महादेवस्य उपासनां कृत्वा स्नानकरणेन मनुष्यः सम्पूर्णयज्ञस्य फलं प्राप्नोति। अगस्त्योश्रमः पापनाशकः। अत्र स्नानेन ब्रह्महत्यादोषतो मुक्तो भवति। कार्तिकमासि कृष्णपक्षे चतुर्दशीतिथौ इन्द्रियसंयमपूर्वकमेकाग्रचित्तं घृतेन स्नानं करोति चेत् एकोविंशतिकूलं यावत् शिवधाम याति। अत्र उपानहं छत्रं सुवर्णपात्रे भोजनं ब्राह्मणाय ददाति चेत् कोटिगुणफलं प्राप्नोति। रविस्तवतीर्थे स्नानेन मनुष्यः राजा भवति।

**इन्द्रतीर्थम् -**

नर्मदायाः दक्षिणे इन्द्रतीर्थे एकरात्रमुपवासं कृत्वा स्नानं कृत्वा विधिपूर्वकं जनार्दनपूजनेन सहस्रगोदानस्य फलं प्राप्नोति विष्णुलोकं याति।

**वारणासीतीर्थेन तापत्रयनिवारणम्-**

वारणास्यां कृत दानं जपं होमं यज्ञं तपस्या ध्यानं अध्ययनंज्ञानं अक्षयं भवति। पापं नश्यति। काशीपुरनिवासेन परमपदं प्राप्नोति मोक्षं वा प्राप्नोति। अविमुक्तक्षेत्रं च परमं पदं, परमतत्त्वं, परमशिवं परमकल्याणमयं वर्तते।

यः मनुष्यः प्रतिदिनं तीर्थे निवसते, तिर्थस्नानेन परमपदं प्राप्नोति, तीर्थाणां च र्चचाकरणेन सर्वपापं विनश्यति। ऋषिणां प्रशसिते प्रयागतीर्थे स्नात्वा पापात् मुक्तः मानवः अश्वमेधयागस्य फलं प्राप्नोति। प्रयागतीर्थस्य स्मरणेन पापनाशो भवति, दर्शनेन कीर्त्तनेन मनुष्यः पापमुक्तः परमगतिं प्राप्नोति। प्रयागे एकमासं यावत् स्थित्वा देवतापितृपुरुषभ्यः तर्पणं ददाति चेत् मनोवाञ्छितं द्रव्यं प्राप्नोति । अत्र मृत्वा व्यक्तिः ब्रह्मलोके याति। प्रयोगे ब्रह्मणेभ्यः गोदानं परमं पवित्रं भवति।

सत्यवादी जितक्रोधो अहिंसा परमां स्थितः। धर्मानुसारी तत्वज्ञो गो ब्रह्मणहिते रतः। मनसा चिन्तितां कामान् सम्यक् प्राप्नोति पुष्कलान्। यमुनायाः नामोच्चारेण पापनाशः स्नानेन जलपानेन नामकीर्त्तनेन मनुष्यः पुण्यस्य भागी भूत्वा कल्याणस्य दर्शनं करोति। तीर्थानां तु परं तीर्थे नदीनामुत्तमा नदी। मोक्षदा सर्वभूतानां महापातकिनामपि।

गङ्गाद्वारे प्रयागे च गङ्गासागरसङ्गमे स्नात्वा दिवं यान्ति ते मृतास्तेऽपुनर्भवाः भवन्ति। तथा चोच्यते-

**श्वेतातीर्थम् -**

श्वेतानदी महादेवस्य पृष्ठोदरभस्मना जाता। विश्रुता त्रिषुलोकेषु सर्वपापप्रणाशिनी। तस्यां स्नातः शुचिर्दान्तस्त्रिरात्रमुषितः पुमान् महाकालेश्वरं दृष्ट्वा रुद्रलोके महीयते। पिण्डं पितृभ्यो यो दद्यात्तस्यास्तीरे कुशैस्तिलैः सुतृप्ताः पितरस्तस्य भवन्तीति न संशयः। श्वेतगङ्गा महापुण्या दुःखदारिद्यमोचनी। अत्र स्नानेन परं सुखमवाप्यते। अत्र स्नानं कृत्वा अनन्तफलं प्राप्नोति। धूपं दीपं च पुष्पमारार्तिकं तथा ये कुर्वन्ति नरश्रेष्ठास्ते नराः पुण्यरूपिणः भवन्ति। विल्वदलं समादाय यो ददाति शिवोपरि वाञ्छितं लभते नित्यं श्वेतायामिति प्रसिद्धम्।

**गणतीर्थम् -**

चन्दनातटे गणैस्तु त्रिविष्टमिति प्रोक्तम्। त्रिविष्टपे नरः स्नात्वा पौर्णमास्यां समाहितः मुच्यते ब्रह्महत्यया। चतुरो वार्षिकान्मा-सान्स्थितो यस्तु त्रिविष्टपे सोऽपि पुण्यो महाभागे रुद्रलोके महीयते। सोमवंश्यो विश्वदत्तः राजा बहुकालपर्यन्तं तपः कृत्वा अत्र श्रीगणेशप्रसादात् गाणपत्यं प्राप्तवान्। अपुत्रो लभते पुत्रान्निर्धनो लभेत धनम्। अविद्यो लभते विद्यां मोक्षार्थीमोक्षमाप्नुयात्। सर्वपापविनिर्मुक्तो याति विष्णोः परं पदम्।

**अग्निपालेश्वरातीर्थम्-**

साभ्रमत्युत्तरे कूले अग्नितीर्थं स्थितं वर्तते। तस्य उत्तरपूर्वेण नातिदूरे पालेश्वरनामकं चण्डीपीठं वर्तते। तच्च सर्वसिद्धिविधायकम्।

अग्नितीर्थे नरः स्नात्वा चामुण्डादर्शनेन गोसहस्रदानस्य फलं प्राप्नोति। तिलचूर्णेन श्राद्धमत्र प्रकर्त्तव्यं पिण्डं दत्वा द्विजां संभोज्य अक्षयं पदमाप्नुयात्। कुकर्दमः राजा पिशाचात् अत्र मुक्तोऽभवत्।

**हिरण्यासङ्गमतीर्थम्-**

यदा साभ्रमती गङ्गा सप्तस्रोताः प्रकीर्तिता तस्मिन् तीर्थे नरः स्नात्वा सद्गतिमाप्नुयात्। ब्राह्मणाः क्षत्रियाः वैश्याः शूद्राश्च येऽत्र स्नानं प्रकुर्वन्ति ते गच्छन्ति शिवालयमिति नात्र संशयः।

**तीर्थमाहात्म्यम् –**

तीर्थमाहात्म्यश्रवणेन संसारबन्धनात् मुक्तो भवति । दर्शनेन स्नानेन तीर्थानां श्रवणेन मनोकामनापूर्तिर्भवति। पर्वताः नद्यः क्षेत्रम् आश्रमः मानसादिसरोवरः इत्यादीनि सर्वाणि तीर्थक्षेत्राणि सन्ति। तीर्थयात्राद्वारा अश्वमेधयागस्य फलं प्राप्नोति । प्रेतयोन्यां न गच्छति।

**उपसंहारः –**

तीर्थक्षेत्राणि केवलं धार्मिकाध्यात्मिकस्थानेभ्यः परे सन्ति; ते भारतीयसंस्कृतेः एकः महत्त्वपूर्णः भागः अस्ति यः जनान् धार्मिकतया, आध्यात्मिकतया, सांस्कृतिकतया, सामाजिकतया च समृद्धं करोति। धार्मिकरूपेण वा आध्यात्मिकरूपेण वा महत्त्वपूर्ण-स्थानानि तीर्थक्षेत्राणि भारतीयसंस्कृतौ अत्यन्तं महत्त्वपूर्णानि सन्ति। एतेषां तीर्थस्थलानां मुख्यं महत्त्वं धार्मिक-आध्यात्मिक-अनुभवस्य अपि च सांस्कृतिक-सामाजिक-मूल्यानां प्रवर्धनम् अस्ति।

**सन्दर्भग्रन्थसूची –**

1. पद्मपुराणम्, गीताप्रेस, गोरखपुर
2. पद्मपुराणम्, चौखम्बापब्लिकेसनस्, दिल्ली
3. पद्मपुराणम्, नागपब्लिकेसनस्, दिल्ली
4. पद्मपुराणम्, चौखम्बासुरभारती, वाराणासी

**पाद टिप्पणी**

[1] पद्मपुराणम्- १९/८-१०